दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

■ पृष्ठ-4 ■ वर्ष-3 ■ अङ्क-309

1 02.09.2024 सोमवासरः वि.सं. २०८० भाद्रपदकृष्णअमावस्या भाद्रपद 18 प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com


## एयर-मार्शल तेजिन्दर सिंहः भारतीय-वायु-सेनायाः उप-प्रमुखः



एयर-मार्शल तेजिन्दर सिंहः नवदिल्ल्यां भारतीय-वायु-सेनायाः उप-प्रमुखस्य पदभारं संभालितवान्। पदभार ग्रहणानन्तरं तेनराष्ट्रिय-युद्ध-स्मारकम् उपेत्य सर्वोच्च-बलिदान-कर्तृभ्यः वीरेभ्यः पुष्पाञ्जलिः अर्पिता। एयर-मार्शल तेजिन्दर सिंहः राष्ट्रियरक्षा अकादम्याः पूर्वछात्रः अस्ति। सप्तोत्तर-द्विसहस्रतमे वर्षे तस्मै वायु सेनापदकम् अथ द्वा-विंशत्युत्तर-द्विसहस्र-तमे अति- विशिष्ट-सेवा-पदकं च उपायनीकृतम्।

## वरिष्ठनेता के.सी. त्यागी जनतादलप्रवक्तापदात् त्यागपत्रं प्रदत्तवान्

जनता-दल-यूनाइटेड इत्यस्य दलस्य वरिष्ठनेता के.सी. त्यागी दलप्रवक्तापदात् त्यागपत्रं प्रदत्तवान्। तस्य स्थाने राजीव-रञ्जन-प्रसादः दलस्य नवीनः प्रवक्ता नियुक्तः। अत्रावधौ श्रीत्यागी अवोचत् यत् सः निराशायां नास्ति। साम्प्रतमपि सः दलेन सहास्ति। असौ अकथयत् यत् असौ जदयू इत्यस्य राजनीतिक-परामर्शदः अस्ति अपि च बिहारराज्यस्य मुख्यमन्त्रिणं नीतिशकुमारं प्रति तस्य राजनीतिक- प्रतिबद्धतास्ति।

## अमरीका-ओपन टेनिस मिक्स्ड डबल्स स्पर्धायां पुरुषैकलद्वन्द्वे-भारतस्य एकं स्वर्णपदकमेकं रजतपदकम्



बैडमिण्टन-प्रतियोगितायाः-पुरुषैकलद्वन्द्वे-भारतम् एकं स्वर्णपदकं, एकं रजतपदकम् अथ कांस्यपदकत्रयं समय साम्प्रतं पदकतालिकायां द्वाविंशतितमे स्थाने अस्ति। तावत् अमरीका-ओपन टेनिस मिक्स्ड डबल्स इत्येतस्याः स्पर्धायाः प्रागुपान्त्यचक्रे रोहनबोपन्ना इत्येषः अथ इंडोनेशियादेशस्य अल्दिला सुत्जियादी प्रविष्टवन्तौ। अत्र प्रागुपान्त्यचक्रीय- स्पर्धायां बोपन्ना अथ अल्दिला इत्येताभ्यां जॉन पेस-कैटरीना सेवा इति प्रतिद्वन्द्वि-द्वयं पराजितम्। तत्रैव स्पर्धायाः उपान्त्यचक्रे बोपन्ना-अल्दिला इत्येतयोः द्वन्द्वः मैथ्यू एबडेन-बारबरा क्रेग इत्येताभ्यां समं समाचरितः। इत्थं बोपन्ना इत्येतस्य अथ मैथ्यू एब्डेन इत्येतस्य युगलं पुरुषडबल्स इति स्पर्धायाः तृतीयं चरणं प्राविशत्

## नवनिर्मितस्य वन्देभारतरेलयानस्य शयनयान श्रेण्याः निरीक्षणं कृतवान् रेलमन्त्री अश्विनीवैष्णवः



रेलमन्त्री अश्विनीवैष्णवः बेंगलुरूनगरे नवनिर्मितस्य वन्देभारतरेलयानस्य शयनयान श्रेण्याः निरीक्षणं कृतवान्। असौ कथितवान् यत् वन्देभारतशयनयानस्य नवीनं संस्करणं परीक्षणाय सज्जमस्ति। आगामिषु त्रिषु मासेषु यात्रिणः अनेन लाभेन लाभाविन्ताः भविष्यन्ति। श्रीवैष्णवः प्रोदीरितवान् यत् अस्मिन् वन्देभारतशयनयाने अनेकानि संशोधनानि जातानि । साम्प्रतं वन्देभारतमेट्रोरेलयानस्य अपि परीक्षणमपि प्रचलति। स्वदेशे निर्मित वन्देभारत-शयनयाने यात्रिभ्यः अनेकानि सौविध्यानि समेधितानि। अवधेयं वर्तते वन्देभारतरेलयानस्य एतस्यां शयनयानश्रेण्यां षोडश श्रेण्यः त्र्यशीत्यधिक अष्टशतम् आसनानि भविष्यन्ति इति।

## सर्वोच्च- न्यायालयस्य नूतन-ध्वजस्य प्रतीक चिह्नस्य च अनावरणम् अकरोत् राष्ट्रपतिः द्रौपदी-मुर्मू



राष्ट्रपतिः द्रौपदी-मुर्मु नवदिल्ल्यां सर्वोच्च-न्यायालयस्य नूतन-ध्वजस्य प्रतीक चिह्नस्य च अनावरणम् अकरोत्। सममेव सा राष्ट्रिय-जनपद- न्यायपालिक-सम्मेलनस्य समापन-सत्रमपि सम्बोधितवती। अस्य द्वि-दिवसीय-सम्मेलनस्य आयोजनं सर्वोच्च न्यायालयेन कृतम्। अस्मिन् जनपद-न्यायपालिकायां पञ्चसत्राणि आयोजितानि। तेषु आधारिक-संरचना समग्र-न्यायालय-कक्षः न्यायिक-सुरक्षा प्रकरण- प्रबन्धनं प्रशिक्षणं च सम्मिलितानि आसन्। गतदिने प्रधानमन्त्री नरेन्द्रमोदी सम्मेलनस्य उद्घाटनावसरे अवोचत् यत् महिलासु अत्याचारः बालानां सुरक्षा च समाजाय गभीर-चिन्तायाः विषयो विद्यते। तेनोक्तं यत् देशे महिलानां सुरक्षायै कठोरविधि-निर्मितास्ति परं तासां प्रभाविरूपेण क्रियान्वयनस्य आवश्यकता वर्तते।

## उत्तराखण्डराज्ये ऋषिकेशस्य एम्स इत्याख्ये संस्थाने उपराष्ट्रपतेः सम्बोधनम्



उपराष्ट्रपतिः जगदीपधनखड़ः कोलकातानगरे एकया महिला-प्रशिक्षु-चिकित्सकया सह घटनां निन्दितवान्। असौ समाहूतवान् यत् एतादृशेषु अपराधेषु सम्मिलितानां दोषिणां दण्डनाय एकस्य तन्त्रस्य निर्माणम् आवश्यकमस्ति इति। उत्तराखण्डराज्ये ऋषिकेशस्य एम्स इत्याख्ये संस्थाने छात्रान् सङ्काय-सदस्यान् सम्बोधयन् श्रीधनखड़ः प्रोक्तवान् यत् अक्षम्यापराधेभ्यः कठोराचारणं विधीयते। असौ चिकित्सकानां परिचारिकानां स्वास्थ्यकर्मिणां च सुरक्षायै बलं प्रदत्तवान्। इतः पूर्वं स्वीय-द्वि-दिवसीययात्रायाः द्वितीये दिने उपराष्ट्रपतिः देहरादूनस्यस्य राष्ट्रिय-भारतीय-सैन्य-महाविद्यालयस्य प्रशिक्षून् सम्बोधितवान्। तदनु सैन्यविद्यालयेषु बालिकानां प्रवेशस्य निर्णयम् अभिनन्दितवान्। तेन भणितं यत् बालिकानां प्रवेशः लैङ्गिकसमानतां लैङ्गिकन्यायं च प्रदर्शयति यत् अस्मिन् दिशि सकारात्मकः पदक्रमः उत्थापितः।

## समग्रदेशे समाचर्यते पोषण-सप्ताहः




समग्रदेशे राष्ट्रिय-पोषण-सप्ताहः समाचर्यते। अयं सप्ताहः प्रतिवर्षं सितम्बर मासस्य प्रथमदिनाङ्कतः सप्तमदिनाकं यावत् परिपाल्यते। अस्य वार्षिककार्यक्रमस्य प्रारम्भः द्वयशीत्यधिक- नवदश-शततमेवर्षे महिला-बाल-विकास-मन्त्रालयस्य खाद्य-पोषण मण्डलद्वारा विहितः। आसप्ताहं प्रचल्यमाणस्य अस्योत्सवस्य उद्देश्यं जनानां मध्ये पोषण-स्वास्थ्य-सम्बद्ध-जागरूकतायाः संवर्धनमिति। अत्रावसरे नैकाः सङ्गोष्ठ्यः कार्यशालाः सम्मेलनानि आयोज्यन्ते। शैक्षिककार्यक्रमाः

## सुभाषितम्

अपां प्रवाहो गांगोऽपि
समुद्रं प्राप्य तद्रसः।
भवत्यवश्यं तद्विद्वान्
नाश्रयेदशुभात्मकम्॥
(कामन्दकीयनीतिसार)

**भावार्थः-** गंगा के जल का प्रवाह भी समुद्र को प्राप्त कर तद्रस हो जाता है, इसीलिए विद्वान् व्यक्ति को अशुभ मन वाले व्यक्तियों का साथ नहीं करना चाहिए।

**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति


कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११


## देशस्य पश्चिम-मध्य-दक्षिण- भागेषु प्रचण्ड-वर्षायाः सञ्चेतना- ऋतु-विज्ञान-विभागः

ऋतु-विज्ञान-विभागेन देशस्य पश्चिम-मध्य-दक्षिण- भागेषु प्रचण्ड-वर्षायाः सञ्चेतना प्रसारिता अस्ति। विभागेनोक्तं यत् विदर्भ तेलङ्गानायां च अद्य तीव्रवृष्टेः सम्भावना वर्तते। असम-तटीय-आंध्र-प्रदेश- यनम-केरल-माहे-तेलंगानायाम् अपि प्रचुर-वर्षायाः संभावना अस्ति। ऋतु-विज्ञान-विभागेन असना इति चक्रवातस्य पश्चिम-दक्षिण-पश्चिम-दिशि समेधनेन शनैः शनैः शिथिलता अपि सम्भाव्यते। अयं चक्रवातः पश्चिम-बङ्गालस्य खात्याम् उत्तरपश्चिम- प्रति समेधितम्। तेलङ्गानाराज्यस्य विभिन्नेषु स्थलेषु अतिवृष्टिः भवति। अनया राज्ये जनजीवनं प्रभावितं जातम् तथा च विभिन्नानां जनपदानां निम्नक्षेत्रेषु जलसङ्ग्रहणमपि जातम्। राज्यप्रशासनेन एकादश जनपदानां प्रशासनेभ्यः रक्तवार्णिकी सञ्चेतना प्रख्यापिता। मुख्यमन्त्री रेवन्तरेड्डी आपात्सेवानाम् अधिकारिभ्यः चतुर्विंशतिहोरां यावत् उपलब्धतायै निर्देशः प्रदत्तः। आन्ध्र-प्रदेश-आपत्-प्रबन्धन-प्राधिकरणेन असना इति चक्रवात-विषये सञ्चेतितम् यत् अयं चक्रवातः गतरात्रौ सार्ध-द्वादश-वादनात् सार्ध-द्विवादनं यावत् कलिङ्गपट्टन-तटम् उत्क्रान्तः । अस्य चक्रवातसस्य प्रभावेन उत्तर-आन्ध्र प्रदेश दक्षिण-ओडिसा क्षेत्रे प्रभाविते भविष्यतः। राज्यस्य नैकेषु भागेषु वृष्टिः संजायते। राज्यप्राधिकरणे सञ्चेतितं यत् कृष्णानद्याः जलस्तरं प्रथमस्तरात् उपरि विद्यते।

# हिमाचले आर्थिकसंकटः नास्ति, वयं केवलं केन्द्रात् अधिकारं याचयामः - मुख्यमंत्री सुखविन्दरसिंहसुक्खुः



हिमसंस्कृतवार्ताः - शिमला। हिमाचलप्रदेशस्य वित्तीयस्थितेः विषये मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत्, "वयं केवलं केन्द्रात् स्वाधिकारं याचयामः। यदा विकासाः क्रियन्ते तदा एतादृशनिर्णयेन अल्पकालीनविघटनं भवति, तस्य अर्थः न भवति यत् राज्यं आर्थिकसंकटे अस्ति । वयं वित्तीयव्यवस्थां व्यवस्थितरूपेण सम्यक् कुर्मः । वयं वित्तीयानुशासने अग्रे गन्तुं कामाः।

## 'पञ्चतारकहोटेलानां कृते निःशुल्कजलं, अनुदानित-विद्युत् च न्याय्यं नास्ति'

मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः उक्तवान् यत् वेतनं स्थगयित्वा अस्माकं अभिप्रायः अस्ति जागरूकतां जनयितुं, यः व्यक्तिः विद्युत्बिलं दातुं शक्नोति तस्मै निःशुल्कं विद्युत्बिलं किमर्थं दातव्यम्? यः जलबिलं दातुं शक्नोति तस्मै किमर्थं निःशुल्कं जलं दातव्यम् ? भाजपासर्वकारेण २०२२ तमस्य वर्षस्य जूनमासे सर्वेषां जलबिलं निःशुल्कं कृतम्, परन्तु भवन्तः पञ्चतारकहोटेलेभ्यः निःशुल्कं जलं, अनुदानितविद्युत् च ददति यत् न्याय्यं नास्ति।"

# आर्थिकसंकटस्य अभावेऽपि समये एव कर्मचारिभ्यः वेतनं दीयते: हर्षवर्धनचौहानः

हिमसंस्कृतवार्ताः - शिमला।हिमाचलप्रदेशः आर्थिकसंकटं गच्छति, विपक्षः निरन्तरं सर्वकारं लक्ष्यं करोति। आर्थिकसंकटस्य अभावेऽपि कर्मचारिभ्यः समये एव वेतनं प्रदत्तं भवति इति सर्वकारस्य विश्वासः। विपक्षनेता जयरामठाकुरः राज्यं दिवालियापनं प्रति नेतुम् आरोपं कृतवान्, यस्य कारणेन राजनैतिकवातावरणं तापितं जातम्। तस्मिन् एव काले उद्योगमन्त्री हर्षवर्धनचौहानः विपक्षस्य आरोपानाम् उत्तरं दत्त्वा राज्ये आर्थिकसंकटः अस्ति किन्तु राज्यं आर्थिकदिवालियापनं प्रति न गच्छति इति अवदत्। राज्यसर्वकारः कर्मचारिभ्यः समये वेतनं ददाति, विकासकार्यमपि क्रियते। मुख्यमन्त्री राज्यस्य आर्थिकस्थितौ उन्नयनं कर्तुं कार्यं कुर्वन् अस्ति तथा च अस्मिन् विषये कठोरनिर्णयाः अपि क्रियन्ते।



हर्षवर्धनचौहानः अवदत् यत् केन्द्रसर्वकाराद् जीएसटी-अन्तर्गतं ५०० कोटिरूप्यकाणि प्राप्यन्ते, यत् २०२२ तमे वर्षे स्थगितम् भविष्यति। केन्द्रसर्वकाराद् प्राप्तम् अनुदानमपि न्यूनीकृतम् अस्ति। अस्य कारणात् राज्ये आर्थिकसंकटमपि उत्पन्नम् अस्ति । सः अवदत् यत् राज्यस्य आर्थिकस्थितिं पुनः मार्गं प्रति आनेतुं प्रयत्नाः क्रियन्ते, आयस्य स्रोतः वर्धयितुं च कार्यं क्रियते। अपव्ययव्ययस्य नियन्त्रणं क्रियते।

# धान्यक्रयणार्थं १० सितम्बरतः उद्घाट्यते पटलम्
# विभागेन धान्यस्य मूल्यं प्रतिक्विन्टलं २३२० रुप्यकाणि इति निर्धारितम्



हिमसंस्कृतवार्ताः - शिमला। खाद्यापूर्तिविभागः १० सितम्बर दिनाङ्कात् परं राज्यस्य कृषकाणां कृते धान्यक्रयणार्थं पटलम् उद्घाटयिष्यति। कृषकाः धान्यसस्यविक्रयणार्थं पटले पञ्जीकरणं कर्तुं शक्नुवन्ति। खाद्य- आपूर्तिविभागेन कृषकाणां कृते धान्यसस्यस्य क्रयणस्य सज्जता आरब्धा अस्ति। राज्यस्य धानक्रयणकेन्द्रेषु १० अक्टोबरतः ३१ दिसम्बरपर्यन्तं धान्यस्य क्रयणं भविष्यति। धान्यसस्यस्य मूल्यं प्रतिक्विन्टलं २३२० रुप्यकाणि इति निर्धारितम् अस्ति । राज्ये कृषकाणां धान्यक्रयणार्थं ११ विपण्यः प्रस्ताविताः सन्ति, येषु खाद्यान्नविपणी-फतेहपुरम्, रियाली, मीलवां, नग्रोटाबगवां जिला कांगड़ा, धौलाकुआं, पांवटासाहब जिला सिरमौरम् , विपणीप्राङ्गणम् नालागढ़म्, मलपुर बद्दी जिला सोलनम् तथा विपणीप्राङ्गणम् टकराला, रामपुरम् जिला ऊनायां धान्यक्रयणकेन्द्राणि निर्मातव्यानि सन्ति। अस्मिन् समये विभागेन २३००० मेट्रिकटन धान्यसस्यस्य क्रयणस्य लक्ष्यं निर्धारितम् अस्ति ।

कृषकाणां पञ्जीकरणार्थं विभागेन पटलं सज्जीक्रियते। धान्यक्रयणसम्बद्धाः सर्वाः सूचनाः विभागस्य अस्मिन् पटले उपलभ्यन्ते। राज्यस्य कृषकाः विभागस्य एतत् पटलं गत्वा, कस्मिन् अपि कम्प्यूटर-केन्द्रे अथवा कस्मिन् अपि लोकमित्र-केन्द्रे गत्वा ततः स्वस्य मोबाईल-यन्त्रे च पटल-मध्ये पञ्जीकरणं कर्तुं शक्नुवन्ति । पटले पञ्जीकरणानन्तरं कृषकाणां कृते धान्यसस्यस्य विक्रयणस्य टोकनसङ्ख्या, तिथिः च कथिता भविष्यति। पञ्जीकरणार्थं कृषकाणां आधारसंख्या, वित्तकोषसंख्या, अन्यसूचनाः विभागस्य पटले अपलोड् करणीयाः भविष्यन्ति।

# पूर्वप्राथमिककक्षाणां शिक्षण-सामग्रीविषये विचारविमर्शः



हिमसंस्कृतवार्ताः - शिमला। हिमाचले पूर्वप्राथमिकवर्गाणां सामग्रीं सज्जीकर्तुं चतुःदिवसीयकार्यशालायाः आयोजनं कृषिसहकारीकर्मचारिप्रशिक्षणसंस्थायां सांगटी इत्यत्र कृतम्। पूर्वप्राथमिकवर्गाणां सामग्रीसमीक्षणाय विकासाय च STAR परियोजनायाः अन्तर्गतं समग्रशिक्षाद्वारा संचालितानाम् विभिन्नकार्यशालानां भागरूपेण एषा प्रथमा चतुर्दिवसीयकार्यशाला आसीत्। बालवाटिका-१, बालवाटिका-२, बालवाटिका-३ इत्येतेषां कृते आवश्यकशिक्षण-सह-शिक्षणसामग्रीणां समीक्षां कृत्वा निर्माणं च उद्दिश्य समग्रशिक्षानिदेशकस्य राजेशशर्मा इत्यस्य मार्गदर्शनेन एषा कार्यशाला आयोजिता आसीत्। अस्याः कार्यशालायाः संयोजकः राज्यसमन्वयकः पूर्वप्राथमिकव्यापक शिक्षा दिलीपवर्मा अकरोत्। अस्मिन् राज्यस्य अष्टजनपदेभ्यः पूर्वप्राथमिकसमन्वयकाः तथा प्रथमसङ्गटनस्य राष्ट्रियप्रतिनिधयः तथा प्रथमसङ्गटनस्य जिलास्तरीयसदस्यैः सहितं ४५ प्रतिभागिनः भागं गृहीतवन्तः। अस्यां कार्यशालायां पूर्वप्राथमिकक्रियाकलापपुस्तकस्य शिक्षणसामग्रीणां च समीक्षा कृता अस्मिन् च मुख्यतया पूर्वप्राथमिकक्रियाकलापपुस्तकस्य कार्यं कृतम्।

अस्यां कार्यशालायां प्रतिभागिनः चतुर्षु समूहेषु विभक्ताः आसन् तथा च प्रत्येकं समूहं बालवाड़ी-एकस्य, द्वौ, त्रयः च मासिकरूपेण क्रियाकलापानाम् योजनां कर्तुं कार्यं नियुक्तम्। एतानि कार्याणि पूर्वप्राथमिककक्षासु शिक्षकैः पाठनीयाः अवधारणायाः आधारेण भविष्यन्ति। कार्यशालायाः कालखण्डे सर्वेषां समूहानां स्वस्वकार्यं अन्तिमरूपेण निर्धारितं कृत्वा राज्यसमन्वयकपूर्वप्राथमिकसमग्र शिक्षा दिलीपवर्मा इत्यनेन निर्देशः दत्तः यत् ते अस्याः श्रृङ्खलायाः अग्रिमकार्यशालापर्यन्तं वार्षिकक्रियाकलापयोजनां अग्रे सारयन्तु। राज्यस्य ६२९७ प्राथमिकविद्यालयेषु पूर्वप्राथमिकवर्गाः सफलतया सम्पादिताः सन्ति। एतेषु बालकानां सर्वतोमुखविकासे बलं दीयते

# अस्मिन् मानसूनर्तौ ६४ जनाः मृताः, १२६५ कोटिरूप्यकाणां हानिः



हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः । अस्मिन् वर्षे अपि हिमाचलप्रदेशे मानसूनः विनाशं कृतवान् अस्ति। राज्यस्य अनेकेषु भागेषु बृहद्विनाशः अभवत् । राज्यस्य आपदाप्रबन्धनप्राधिकरणस्य प्रतिवेदनानुसारम् अस्मिन् मानसूनर्तौ भूस्खलने, जलप्रलयेन, मेघविस्फोटेन च ६४ जनाः मृताः, ३० जनाः अद्यापि अदृश्याः सन्ति। एतावता वातावरणादिदुर्घटनाभिः २७१ जनानां प्राणाः गताः, ४२३ जनाः घातिताः । राज्य आपदा प्रबन्धन प्राधिकरणस्य प्रारम्भिकक्षतिप्रतिवेदनानुसारं मेघविस्फोटस्य कारणेन २३ जनाः, जलप्रलयानन्तरं निमज्जनेन च २६ जनाः, भूस्खलनेन षट् जनाः, जलप्लावनकारणात् अष्टजनाः, विद्युत्पातेन एकः जनाः मृताः। एतदतिरिक्तं सर्पदंशात् २५, विद्युत्प्रहारेन १५, पतनेन ३८ जनाः मृताः । वर्षाकाले मार्गदुर्घटनानां कारणेन १२० जनानां प्राणाः, अन्यकारणात् ९ जनानां प्राणाः गताः। राज्ये १२६५ कोटिरूप्यकाणां हानिः अनुमानिता अस्ति । राज्ये मेघविस्फोटस्य, जलप्लावनस्य च ५१ घटनाः अभवन् । एतदतिरिक्तं ४० प्रमुखभूस्खलनस्य घटनाः अभिलेखिताः सन्ति । राज्ये अतिवृष्ट्या किन्नौरस्य रिस्पानालायां जलप्लावनम् अभवत् । सरेहीनाला, पलचाननाला, हकड़ी, रामपुरं, समेज, सिन्हगाढ़, पधर, मण्डी तथा कुल्लू-मनाली-लेह राजमार्गस्य समीपे मेघविस्फोटेन अप्रत्याशिता क्षतिः उत्पन्ना। राज्ये अद्यावधि १२६५ कोटिरूप्यकाणां अनुमानितहानिः विचार्य राज्यसर्वकारेण केन्द्रात् विशेषाश्रमसंकुलस्य आग्रहः कृतः। राज्यसर्वकारेण एतावता जनानां कृते १० कोटिरूप्यकाणां आर्थिकसाहाय्यं प्रदत्तम्।

# हिमालयं रक्षतु अभियानस्य अन्तर्गतं छात्राः शिक्षकाः च हिमालयस्य रक्षार्थं प्रतिज्ञां कृतवन्तः




**हिमसंस्कृतवार्ताः- आचार्य नवीनममगाइं पौडी गढवालः।** हिमालयं रक्षतु अभियानस्य अन्तर्गतम् अद्य कोट विकासखण्डस्य ब्रिगेडियर- विद्याधरजुयाल संस्कृतविद्यालयस्य सर्वे छात्राः शिक्षकाः च हिमालयस्य रक्षार्थं प्रतिज्ञां कृतवन्तः यस्मिन् सर्वे छात्राः, शिक्षकाः, कर्मचारिणः च उपस्थिता आसन। प्रधानाचार्य अनुयाप्रसादसुन्दरियालवर्यः हिमालयस्य महत्त्वस्य विषये कथितवान्। अस्याः अभियानस्य अन्तर्गतं विद्यालये शिक्षकाः छात्रान् हिमालयस्य विशेषतां ज्ञापयन्ति स्म आचार्य नवीन ममगाईं इत्यनेन उक्तं यत् भारतस्य उत्तरदिशि स्थितानां सर्वेषां दिशानां आत्मा इव हिमपर्वताः अस्माकं धरोहरम् अस्ति। सम्पूर्ण भारतस्य मुकुटमस्ति, हिमालयः अस्मान् धैर्यं, साहसं, दृढतां च प्रेरयति इति उक्तवान्। आचार्येण अनूपवर्येण कथितं हिमालयस्य प्रत्येकं वैशिष्ट्यं कुमारसंभवस्य काव्ये विस्तरेण वर्णितम्। अवसरेऽस्मिन् आचार्यः ईशान डोभालः, कमलदीपः, नीरजः, आशीषः, अंकितश्च इत्यादयः उपस्थितासन्। वर्तमानसंकटात् कथम् उद्धारयितुं छात्रान् मार्गदर्शनं कृतवन्तः सर्वे छात्राः अस्मिन् अभियाने भागं गृहीतवन्तः, हिमालयस्य रक्षार्थं च संकल्पं कृतवन्तः।

# क्षेत्रसङ्गठनमन्त्रिणः संस्कृतभारती देहरादूनस्य अधिकारिभिः सह चर्चा




**हिमसंस्कृतवार्ता-** देहरादूनम् 01 सितम्बर 2024 दिनाङ्के रविवासरे क्षेत्रसङ्गठनमन्त्री देवेन्द्रपाण्ड्या संस्कृतभारती देहरादूनस्य अधिकारिभिः सह हरिद्वारनगरे आयोजितस्य अखिलभारतीयसम्मेलनस्य सज्जतायाः विषये संघकार्यालये धर्मपुर देहरादूने चर्चां कृतवान्। उक्तसम्मेलने सम्पूर्णभारतस्य १२०० संस्कृतविद्वांसः संस्थानां प्रतिनिधयः च उपस्थिताः भविष्यन्ति। संस्कृतस्य प्रचारार्थं कार्ययोजनां निर्मितं भविष्यति। संस्कृतभाषायाः विस्तारसम्बद्धाः विविधाः पक्षाः अपि चर्चां करिष्यन्ति। अस्मिन् अधिवेशने भारतसर्वकारस्य राज्यसर्वकारस्य च प्रतिनिधयः अपि उपस्थितः भविष्यन्ति। देहरादूनस्य कार्यकर्तारः अधिवेशनस्य व्यवस्थां करिष्यन्ति। अस्मिन् सत्रे संस्कृतभारती देहरादूनस्य जिलाध्यक्षः डॉ. रामभूषण बिजल्वाणः, महानगरमंत्री आचार्य माधवपौडेलः, जिलामंत्री प्रदीपसेमवालः, विभागसंयोजकः नागेन्द्रव्यासः, खंडसंयोजकः डोईवाला डॉ. आनन्दजोशी, रायपुर खंडसंयोजकः धीरजबिष्टः, डॉ. बीनापुरोहितः, श्वेतारावतः, नीतीशमैठानी, किशोररावतः कार्यकर्तारः उपस्थिताः आसन्।

# कनेड़ राजकीय विद्यालयस्य छात्राभिः विजिता बॉलीवाल इति प्रतियोगिता



**हिमसंस्कृतवार्ताः धर्मशाला 2 सितम्बर।** हिमाचलप्रदेशस्य विद्यालयेषु छात्राणां सार्वभौमिकविकासाय क्रीडाप्रतियोगितानाम् आयोजनं विभिन्नेषु प्रखण्डेषु प्रचलति। अस्मिन्नावसरे धर्मशालायाः जदरांगलविद्यालये प्रचलितायां बॉलीबाल इति प्रतिस्पर्धायां राजकीयवरिष्ठमाध्यमिकविद्यालयः कनेडस्य छात्राभिः उत्तमं प्रदर्शनं कृतम्। छात्राभिः क्रीडितासु प्रतियोगितासु प्रतियोगिता द्वयं विजित्य प्राक्रान्तिमायां(सेमीफाइनल) क्रीडायां प्रवेशः कृतः। छात्राभिः सेंटमेरीविद्यालयस्य छात्राः पूर्वप्राकान्तिमायां पराजित्य प्राकान्तिमायां प्रतियोगितायां प्रवेशः कृतः। प्राकान्तिमायां क्रीडायां छात्राणां सम्मुखीकरणं धर्मशालाकन्याविद्यालयस्य छात्राभिः सह अद्य ११ वादने भविष्यति। अस्मिन्नावसरे विद्यालयस्य प्राधानाचार्यया प्रसन्नता प्रकटिता, तत्रैव विद्यालयस्य शिक्षकेषु छात्रेषु च विशेषोत्साहः दृश्यते।

# केन्द्रीय- संस्कृत- विश्वविद्यालय- नवदेहलीद्वारा संचालिते संस्कृताध्ययनकेन्द्रे (ए. पी. सेन मेमोरियल गर्ल्स पी. जी. कालेज चारबाग लखनऊ) नामांकनं समारब्धम्

हिमसंस्कृतवार्ताः - जगदीश डाभी। केन्द्रीय- संस्कृत- विश्वविद्यालयस्य नवदेहलीद्वारा संचालिते संस्कृताध्ययनकेन्द्रे नामाङ्कनम् /आवेदनं प्रारब्धम्। ए. पी. सेन मेमोरियल गर्ल्स पी. जी. कालेज चारबाग लखनऊ इत्यत्र केन्द्रीय- संस्कृत- विश्वविद्यालय- नवदेहलीद्वारा 2024 तमे वर्षे स्थापिते "संस्कृताध्ययनकेन्द्रे" 2024-2025 शैक्षणिकवर्षस्य कृते ऑनलाइन नामाङ्कनं प्रारब्धम् अस्ति। केन्द्राध्यक्षा प्रो. रचना श्रीवास्तव महोदया, केन्द्राधिकारी डॉ ऋचा मुक्ता महोदया अस्ति। अध्यक्षमहोदयया उक्तं यत् अस्य केन्द्रस्य प्रमाणपत्रपाठ्यक्रमे कोऽपि दशमश्रेणी (हाईस्कूल) उत्तीर्णः, डिप्लोमापाठ्यक्रमे कोऽपि प्रमाणपत्रपाठ्यक्रमः उत्तीर्णः 1200/- रुप्यकशुल्कं स्वीकृत्य ऑनलाइन नामाङ्कनं कर्तुं शक्नोति एवञ्च परीक्षासमये 300/- परीक्षाशुल्कं दत्त्वा परीक्षायाः आवेदन कृत्वा परीक्षां दास्यन्ति। आहत्य 1200+300= 1500 शतं धनम् अस्ति। उभयपाठ्यक्रमेषु नामाङ्कितानां सर्वेषां कृते केन्द्रीयसंस्कृतविश्वविद्यालयेन निर्मिताः 5 उच्चगुणवत्तायुक्तानि पुस्तकानि निःशुल्कं प्रदत्तानि सन्ति। सा अपि अवदत् यत् अस्मिन् पाठ्यक्रमे नामाङ्कनं कृत्वा कोऽपि व्यक्तिः कस्यापि वयसः, कस्यापि प्रदेशस्य, यः कदापि संस्कृतं न अधीतवान् तथापि सः संस्कृतभाषायां वक्तुं संस्कृतभाषासाहित्यस्य ज्ञानं च प्राप्तुं शक्नोति। अस्मिन् वर्षे उभयोः पाठ्यक्रमयोः संयोज्य न्यूनातिन्यूनं शतं जनानां नामाङ्कनं कर्तुं लक्ष्यं निर्धारितम्। संस्कृताध्ययनकेन्द्रस्य शिक्षिका डॉ. प्रियंका सिंहः उक्तवती यत् अस्य केन्द्रस्य उद्देश्यं संस्कृतभाषा प्रमाणपत्र- डिप्लोमा- पाठ्यक्रमस्य संचालनं तथा च संस्कृतस्य प्रचारः प्रसारः अस्ति। सर्वे नामाङ्किताः जनाः समयानुसारेण आफलाइन पठितुं शक्नुवन्ति। अत्र कक्षा वर्णमालातः आरभ्य सम्भाषणं पर्यन्तं भवति। पुस्तकस्याभ्यासमपि शिक्षकाः कारयन्ति, गीतं, कथा, सुभाषितानि, समयः, संख्या सर्वेषां क्रमशः पाठः भवति। सत्रस्य अन्ते विश्वविद्यालयेन आयोजितायाम् आनलाइनपरीक्षायाम् उत्तीर्णतां प्राप्य सर्वेभ्यः व्यक्तिभ्यः केन्द्रीय- संस्कृत- विश्वविद्यालय नवदेहलीद्वारा प्रमाणपत्रं प्रदत्तं भवति। आनलाइन आवेदनं प्रारम्भं 28 अगस्त- 20 सितम्बर पर्यन्तम्। नामाङ्कनार्थम् लिंक https://csucsl.samarth.edu.in/ एतद् लिंकम् उद्घाट्य ए. पी. सेन मेमोरियल कालेज चारबाग लखनऊ केन्द्रान्तर्गते नामाङ्कनं गृह्यन्ताम्। उभयोः पाठ्यक्रमौ क्रेडिट कोर्स अस्ति।

# संस्कृतशिक्षा- उत्तराखंडशासनस्य निदेशकसचिवयोः केन्द्रीय- संस्कृत- विश्वविद्यालयस्य कुलपतिना सह उपवेशनं जातम्




**हिमसंस्कृतवार्ताः 2 सितम्बर।** देहली- संवादादातृणा संस्कृत महाविद्यालय- विद्यालय शिक्षक संघ उत्तराखंडस्य प्रान्तीयाध्यक्षेण डॉ राम भूषण बिजल्वाणेन ज्ञापितं यत् कुलपतिना प्रो. श्रीनिवासवरखेडीवर्येण सह वार्ताक्रमे ज्ञातं यद् संस्कृतशिक्षाविभागस्य महती उपलब्धिः उत्तराखंडशासनस्य संस्कृतशिक्षायाः सचिवः दीपकगैरोला, निदेशकः डॉ आनंद भारद्वाजश्च उपस्थापितवन्तौ। ताभ्यां सह संस्कृतशिक्षाविभागस्य शिष्टमण्डलमपि सम्मिलितम्। तत्र संस्कृतविश्वविद्यालयहरिद्वारस्य प्रो. दिनेशशास्त्री उत्तराखंडसंस्कृतशिक्षापरिषदः सचिवः डॉ. राजेश शर्मा इत्यादिभिः सह अनेके अधिकारिणः समुपस्थिताः। उत्तराखंडे संस्कृत शिक्षायाः उन्नयने संस्कृत विद्यालय- महाविद्यालयानां मूलसुविधाभिः सह विभिन्नमदेषु वित्तीयसहायतां प्रदातुम् उत्तराखंड सर्वकारस्य स्वप्नपरियोजना द्वितीयराजभाषा संस्कृतस्य उन्नयनहेतवे उत्तराखंडस्य प्रत्येकस्यां जिल्लायां पञ्चप्राथमिक संस्कृतविद्यालयानाम् उद्घाटनं केंद्रीय- संस्कृत- विश्वविद्यालयः वित्तीयसहायतानुदानं प्रदास्यति। उत्तराखंडे द्वितीयराजभाषा- संस्कृतस्य परिकल्पनां सार्थकीं कर्तुं केंद्रीय- संस्कृत- विश्वविद्यालय दिल्लीद्वारा विभिन्नघटकेभ्यो महतीं वित्तीयसहायतां प्रदातुं सहमती प्रदास्यते।

# उत्तराखण्डे डॉ. वाचस्पतिमैठाणीवर्यस्य 75 तमजयन्त्याः अवसरे विभिन्नकार्यक्रमाः

- **समाजसेवकैः, संस्कृतविद्वद्भिः प्रदत्ता श्रद्धाञ्जलिः**
- **द्वितीयसत्रे आयोजिता अखिलभारतीयान्तर्जालीयसंगोष्ठी**
- **पञ्चमाखिलभारतीयसंस्कृतज्ञानप्रतियोगितायाः परिणामाः घोषिताः अभवन्**
- **कविभिः डॉ. मैठाणीवर्यस्य जीवनसंघर्षाधारितानां कवितानां/गीतादिनां वाचनं ।**

**हिमसंस्कृतवार्ताः कुलदीपमैन्दोला। उत्तराखण्ड 2 सितम्बर।** संस्कृतशिक्षाविद् स्वर्गीयः, राष्ट्रपतिपुरस्कारेण सम्मानितः, यः जीवनस्य अन्तिमश्वासपर्यन्तं शिक्षायाः संस्कृतस्य च उत्थानार्थं भूरिपरिश्रमकार्यं कृतवान्। तस्य

डॉ. वाचस्पतिमैठाणीवर्यस्य ७५ तमजयंत्याः अवसरे पूर्वनिर्धारित कार्यक्रमानुसारं स्मृतिमंचद्वारा अखिलभारतीय-अन्तर्जालीयसंगोष्ठ्याः आयोजनं कृतं। संस्कृतसाहित्ये विश्वशान्तिसमाधानेन, संस्कृतस्य अन्ताराष्ट्रियप्रवर्धनेन च सर्वभारतस्तरस्य एषा संगोष्ठी आयोजिता आसीत्। स्मृतिमंचस्य संरक्षकः एवं उत्तराखण्डसर्वकारस्य मन्त्रिमण्डलस्यमन्त्री मंत्रीप्रसादनैथानी एवम् आयोजनमण्डलस्य सदस्यः तथा च डॉ. मैठाणीपरिवारसदस्यैः संयुक्तरूपेण स्वस्तिपाठेन सह दीपं प्रज्वाल्य डॉ. मैठाणीवर्यस्य चित्रे श्रद्धांजलयः समर्पिताः ।

गूगलमीट् इत्यनुसरणे आयोजनं क्रमशः सत्रद्वये "संस्कृतसाहित्ये विश्वशान्तेः उपायाः" तथा "डॉ. वाचस्पतिमैठाणी इत्यस्य व्यक्तित्वं कार्यं च" पञ्चमाखिलभारतीयसंस्कृतज्ञानप्रतियोगितायाः परिणामः" इति विभक्तम् आसीत् ।

## संस्कृतसाहित्येविश्वशान्तेः उपायाः

सायं ७:०० तः ८:०० वादनपर्यन्तं यावत् प्थमसत्रम् अभवत् । यत्र कार्यक्रमरूपरेखायाम् उत्तराखण्डस्य पूर्वशिक्षामंत्री मंत्रीप्रसादनैथानीद्वारा परिचयात्मकसम्बोधने स्व. डॉ. वाचस्पतिमैथाणीकवर्यस्य जीवने प्रकाशः क्षिप्तः।

अस्मिन् कार्यक्रमे केन्द्रीयसंस्कृतविश्वविद्यालयस्य नवीदिल्लीनगरस्य कुलपतिः प्रो. श्रीनिवासवरखेड़ी मुख्यातिथिः उत्तराखण्डसंस्कृतशिक्षाविभागस्य निदेशकः श्री आनन्दभारद्वाजः कार्यक्रमाध्यक्षः, महर्षिवाल्मीकिसंस्कृत-विश्वविद्यालयकैथलहरियाणातः कुलपति प्रो. रमेशचंद्रभारद्वाजः, केंद्रीयसंस्कृतविश्वविद्यालयश्रीरघुनाथ-कीर्तिपरिसरदेवप्रयागस्य निदेशकः प्रो. पी. वी. बी. सुब्रमण्यमम् अतिविशिष्टातिथिः तथा श्रीकृष्णसंग्रहालयकुरुक्षेत्रहरियाणातः पूर्वाध्यक्षः श्री राजेंद्रसिंहराणा , आयुर्वेदरत्न-एवं-उत्तराखंडसर्वकारे पूर्व आयुर्वेदपरामर्शकः डॉ. मायाराम-उनियालः , मुम्बैतः प्रसिद्धसमाजसेविका श्रीमती हरिप्रिया तुरखिया , पूर्वापरशिक्षा निदेशिका श्रीमती कमला पंतः विशिष्टातिथिरूपेण उपस्थिताः आसन्

उत्तराखण्डसंस्कृताकादमीहरिद्वारस्य शोधाधिकारी डॉ. हरीशचन्द्रगुरुरानी , केन्द्रीयसंस्कृतविश्वविद्यालयदेवप्रयागस्य विभागाध्यक्षः डॉ. शैलेन्द्रप्रसादः उनियालः, उत्तराखंड-संस्कृत- विश्वविद्यालयहरिद्वारस्य विभागाध्यक्षः डॉ. शैलेशकुमारतिवाड़ी

, नेपालीसंस्कृतमहाविद्यालयतः प्रधानाचार्यः, डॉ. ओमप्रकाशपुर्वालः "संस्कृतसाहित्ये विश्वशांतेः उपायाः" विषयेस्मिन् शोधपत्रवाचनं कृतवन्तः। यद्यपि केंद्रीयसंस्कृतविश्वविद्यालयरघुनाथकीर्तिपरिसर-देवप्रयागस्य सहायकप्राध्यापकः डॉ. वीरेंद्रसिंहबर्तवालः डॉ.मैठाणीद्वारा केंद्रीयसंस्कृतविश्वविद्यालयरघुनाथकीर्ति- परिसरदेवप्रयागस्य उद्घाटनाय उद्बोधनं प्रस्तुतवान्।






## डॉ. वाचस्पतिमैठाणीवर्यस्य व्यक्तित्वम् एवं कार्यं

अस्मिन्विषये रात्रौ ८:०० तः ९:०० वादनपर्यन्तं निर्धारितम् अयं सत्रः रात्रौ ११:३० वादनपर्यन्तं अचलत् ।श्रीदीपककुमारगैरोला, संस्कृतशिक्षासचिवः उत्तराखंडसर्वकारः, मुख्यातिथिः, उत्तराखंडसंस्कृतविश्वविद्यालयहरिद्वारस्य कुलपतिः प्रो. दिनेशचन्द्रशास्त्री , कार्यक्रमाध्यक्षः, कपार्ट इत्यस्य पूर्वक्षेत्रीयनिदेशकः, डॉ. भगवती प्रसादमैठाणी , वरिष्ठसाहित्यिककविः एवं समाजसेवी श्री शंभूशरणरतूडी , हेमवतीनंदनबहुगुणाकेन्द्रीयसंस्कृतविश्वविद्यालयश्रीनगर-गढ़वालस्य मुख्यनिदेशकः प्रो.भानुप्रसादनैथानी , सर्वोदयी कार्यकर्ता श्री विजयकुमारहाण्डा, गांधीसन्निधिराजघाटदिल्ली, डॉ. वाजश्रवा आर्यः उत्तराखंडसंस्कृताकादमीहरिद्वारस्य सचिवः विशेषातिथिरूपेण उपस्थिताः आसन् । एकस्मिन् समये अन्तर्जालीयगोष्ठ्यां शताधिकाः जिज्ञासुजनाः, सम्पूर्णे कार्यक्रमे च २०० तः अधिकाः भागं गृहीत्वा डॉ. मैठाणीवर्यस्य- व्यक्तित्वविषये ज्ञानं प्राप्तवन्तः ।

## पंचम-अखिलभारतीय-संस्कृतज्ञानप्रतियोगितायां 165 प्रतियोगिनां प्रतिभागः , परिणामघोषितः

स्मृतिमञ्चस्य संरक्षकः पूर्वशिक्षामन्त्री उक्तवान् यत् डॉ. वाचस्पतिमैठाणीवर्यस्य स्मृतौ पञ्चमं क्रमशः अन्तर्जालीय-संस्कृतप्रतियोगितायाः आयोजनं विविधसंस्कृतप्रतियोगितानां सङ्गमे अभवत् यस्मिन् अस्मिन् वर्षे १६५ बालकाः बालिकाः, युवानः, संस्कृतप्रेमिणः च ज्ञानिनो संस्कृतप्रेमिणः भागं गृहीत्वा स्वर्गीयस्य डॉ. वाचस्पतिमैठाणीवर्यस्य गुणान् स्मरणं कृत्वा संस्कृतस्य प्रचारे साहाय्यं कृतवन्तः ।

मुख्यातिथिः, संस्कृतशिक्षासचिवः दीपककुमारगैरोला-महोदयस्य अनुमत्या पञ्चमे अखिलभारतीयसंस्कृतज्ञानप्रतियोगितायां प्रथमदश(१०)स्थानप्राप्तानां प्रतिभागिनां नामानि प्रतियोगितासंयोजकेन कैलाशपतिमैठाणीमहोदयेन घोषितम्।

### यस्मिन् प्रथमत्रयस्थानविजेतारः यथा –

संस्कृतदेशभक्तिगीतप्रतियोगिता (विजेता- प्रतिभागी- कु. संस्कृतिः, अनिरुद्धबहुखण्डी, अक्षितबडोनी क्रमशः ९ तः १४ आयुवर्गे । कु. गीता, कु. अर्चना, हिमांशुराणा १५ तः २४ आयुवर्गे। श्रीकान्तदुदपुडी, रोशनबलूनी, सुनीलधस्माना २५ तः 50 आयुवर्गे । च 51 वर्षाधिकायुवर्गे श्रीमती सरिता मैंदोला, माधवसिंहनेगी, श्रीमती संगीता बहुगुणा प्रथमस्थाने, द्वितीयस्थाने एवं तृतीयस्थाने सम्प्राप्ताः ।

वाल्मीकिरामायणश्लोकोच्चारणप्रतियोगितायां विजेता - सुश्री मृणालिनी काण्डपालः, आयुषथपलियालः, सुश्री नियतिसेमवालः क्रमशः ९ तः १४ वर्षायुवर्गे । कार्तिकेयजगूडी, सुश्री राजुली, साहिलजगूडी १५ तः२५ वर्षायुसमूहे। सुनीलकुमारधस्माना, श्रीमती नीलमथपलियालः, श्रीमती पुष्पारावतः २५ तः ५० वर्षायुसमूहे । यद्यपि 51 वर्षायुसमूहे दिनेशचन्द्रकाण्डपालः, श्रीमती संगीता बहुगुणा एवं माधवसिंहनेगी क्रमशः प्रथमद्वितीयतृतीयस्थाने सम्प्राप्ताः ।

संस्कृतनृत्यप्रतियोगितायां विजेता - सुश्री अनुकृतिनवानी, सुश्री समृधिनेगी, सुश्री अद्विकाराणा क्रमशः 6 तः 10 आयुवर्गे, सुश्री जागृतिजोशी, सुश्री डिम्पलगुसांई, सुश्री प्राची राणा ११ तः १५ वर्षायुवर्गे तथा च 16 तः 25 आयुवर्गे , सुश्री संस्कृतिः धस्माना, कु. कल्पना रावतः, कु. वंशिका भट्टः प्रथमद्वितीयतृतीयस्थाने आसन् ।

## १८ लक्षाधिकाः संस्कृतप्रेमिणः स्वसकारात्मकतां दर्शितवन्तः

अस्य सम्पूर्णस्य कार्यक्रमस्य संयोजकस्मृतिमञ्चस्य संरक्षकमण्डलस्य पदाधिकारिणां च प्रेरणया प्रेरिता श्री कैलाशपतिमैठाणी उक्तवान् यत् अस्मिन् वर्षे आमुखपटले ७ लक्षाधिकाः जनाः अद्यपर्यन्तं च १८ लक्षाधिकाः संस्कृतप्रेमिणः भागं गृहीतवन्तः स्पर्धा सकारात्मकचिन्तनेन स्वरुचिं प्रदर्शितवन्तः।

### प्रमाणपत्रम् एवं पुरस्कारः

संयोजकः श्री कैलाशपति मैथानी जी अवदत् यत् रामायणश्लोकपाठस्य, संस्कृतदेशभक्तिगीतस्य, संस्कृतनृत्यप्रतियोगितायाः च प्रत्येकस्मिन् आयुवर्गे प्रथमतः दशमस्थानं प्राप्तवद्भ्यः सर्वेभ्यः प्रतिभागिभ्यः प्रमाणपत्राणि पत्रालयद्वारा प्रेषितानि भविष्यन्ति, मुम्बेनगरस्य प्रसिद्धसमाजसेवी हरिप्रियातुरखियाद्वारा पूर्ववर्षवत्, अस्मिन् वर्षे अपि प्रथमद्वितीयतृतीयस्थानप्राप्तानां सर्वेषां प्रतिभागिनां कृते पत्रालयेन स्मृतिचिह्नानि/स्मारकपत्रं प्रेषयिष्यते। अन्येभ्यः सर्वेभ्यः प्रतिभागिभ्यः तेषां मेलद्वारा सहभागितायाः प्रमाणपत्राणि प्रेषितानि भविष्यन्ति। संस्कृतसामान्यज्ञानप्रतियोगितायां सर्वेभ्यः प्रतिभागिभ्यः मेलद्वारा सहभागितायाः प्रमाणपत्राणि प्रेषितानि सन्ति।

### कवयः प्रतिभागिनः च स्वप्रस्तुतिं श्रावितवन्तः

उत्तराखण्डस्य जनकविः, श्री बेलीरामकंसवालः गढ़वालीभाषायां, श्री विनय-अण्थवालः , श्रीमती संगीता बहुगुणा हिन्दीभाषायां, डॉ. कृपालसिंहः शीला कुर्माञ्चलीभाषायाम् तथा राजस्थानतः श्रीमती सरोजशुक्ला संस्कृते डॉ. वाचस्पतिमैठाणीवर्यस्य जीवनसंघर्षेषु आधारितं सुंदरगीतं कवितां प्रस्तुतवती । यद्यपि अन्ये केचन प्रतिभागिनः स्वस्य रामायणश्लोकं पठित्वा संस्कृतदेशभक्तिगीतानि प्रस्तुतवन्तः।

कार्यक्रमसंचालनं डॉ. सुभाषडोभालः श्री कमलापतिमैठाणी कृतवन्तौ। अन्तर्जालीयगोष्ठ्यां स्मृतिमंचस्य संचारप्रसारप्रभारी डॉ.विजयकुमारत्यागी , प्रवक्ता श्री प्रशांतजोशी , श्री कमलकिशोरबडोनी , श्री उत्तमसिंह-असवालः, श्री दिनेशडोभालः इत्यादिभिः स्वविचाराः व्यक्तीकृताः ।अस्मिन् सम्मेलने श्री चन्द्रकिशोरमैठाणी , श्री उपेन्द्रमैठानी , डॉ चंडी प्रसादसकलनी , डॉ. रामभूषणविजल्वाणः , श्री करुणापतिमैठानी, श्रीमती माधुरी घिल्डियालः , श्री विजयनारायणगैरोला, श्री दिनेशमैठानी, श्री रामलालनौटियालः लब्बू , श्रीमती संतोषी , श्रीमती कविता , श्रीमती ममता , दिवसपति, एकता, उन्नतिमैठानी उपस्थिताः आसन्। श्री आलोकपतिमैथानी इत्यनेन प्रतियोगितायाः आरम्भात् परिणामपर्यन्तं सम्पूर्णं कार्यक्रमे वेबिनारद्वारा तकनीकिसहायता प्रदत्ता, यस्य सर्वैः बहुप्रशंसा कृता।

